P: ISSN NO.: 2321-290X RNI : UPBIL/2013/55327 VOL-5* ISSUE-9* (Supplementary Issue) May- 2018
Shrinkhla Ek Shodhparak Vaicharik Patrika

# आधुनिकपारम्परिकशिक्षाशास्त्रप्रशिक्षणसंस्थासु प्रयुज्यमानानां विभिन्नगद्यपाठयोजनानां समीक्षणया आदर्शगद्यपाठयोजनायाः स्वरूपम्



**आर्. एल्. नारायणसिंहः**
सहायकाचार्यः,
शिक्षाशास्त्रविभागः,
दयालबाग एजुकेशनल इन्स्टीट्यूट,
आगरा



**आर्. शिवरामकृष्णसिंहः**
सहायकाचार्यः,
शिक्षाशास्त्रविभागः,
राष्ट्रियसंस्कृतसंस्थानम्,
नवदेहली

**सारांशः**

कक्षाशिक्षणात्प्राक् अध्यापकेन निर्दिष्टे समये सम्पूर्णनिश्चितपाठयांशस्य निर्दिष्टशिक्षणोद्येश्यानां सम्पूर्णतया प्राप्त्यर्थं छात्राध्यापकयोः जायमानानाम् अन्तःक्रियाणां विधिप्रविधीनां सामग्रीणाञ्च समाकलनात्मकपूर्वरङ्गसिद्धता एव पाठयोजनेति कथ्यते।

हर्बर्ट्वर्यस्य मस्तिष्कीयः अनुभवग्रहणात्मकः सिद्धान्तः तदीयसिद्धान्ताधारिता पञ्चपदात्मिका पाठयोजना आधुनिकशिक्षामनोविज्ञानेन पञ्चाशद्वर्शेभ्यः पूर्वमेव तिरस्कृता। आधुनिकशिक्षामनोविज्ञानेन अधिगमविषये नैकान् प्रयोगान् विधाय अनेके अधिगमसिद्धान्ताः प्रत्यपादिषत। किञ्च अभिनवेन मनोविज्ञानगतेन संज्ञानात्मकवादेन ज्ञानेन्द्रियाणं ज्ञानग्रहणमननधारणरीतयः सप्रयोगं निरूप्य नवनवसिद्धान्ताः न्यरूपिषत। एवम्भूतान् सिद्धान्तानाधृत्य काले काले नैकाः अधिगमपद्धतयः, पाठयोजनाप्रकाराश्च न्यरूपिषत। इमाश्च पद्धतयः पाठयोजनाप्रकाराश्च नैकाभिः शिक्षकप्रशिक्षणसंस्थाभिः ससाफल्यमनुप्रयुज्यन्ते। परं संस्कृतशिक्षकप्रशिक्षणसंस्थानामियं शोचनीयास्थितिः यदिमाः संस्थाः नाद्यावधि नूतनपाठयोजनाप्रकारानध्येतुम् अनुप्रयोक्तुं वा सन्नाद्धा न सन्ति। अस्माद्धेतोरेव समेष्वपि विद्यापीठेषु प्रतिविद्यापीठमेकप्रकारा पाठयोजना अनुप्रयुज्यते। न केवलमेतत्, तत्तद्विद्यापीठेष्वपि पाठयोजना विषये प्रशिक्षकाणामैकमत्यं न दृश्यते। यदीदृशी स्थितिरग्रेपि अनुवर्तेत तर्हि संस्कृतप्रशिक्षणस्य गुणवत्ता शीघ्रमेव नङ्क्ष्यति। गभीरसमस्यामेनामवगत्यैव अनुसन्धात्रा संस्कृतपाठयोजनायाः गुणवत्ताविकासार्थं शास्त्रीयमध्ययनं विधाय आदर्शगद्यपाठयोजनायाः निर्माणं इत्थं निहितवान्।

**आदर्शगद्यपाठयोजनायाः निर्माणप्रक्रिया**

प्रथमं सर्वेक्षणविधिना शिक्षकप्रशिक्षणसंस्थाभ्यः विभिन्नभाषापाठयोजनाः सङ्कलिताः। संङ्कलितानां तासां पाठयोजनानां गुणदोषविमर्शनपुरस्सरं काचित् प्रश्नावली निर्मिता। प्रश्नावलीयं विभिन्नसांख्यकीय प्रक्रियाभिः अनुसन्धानप्रविधिभिश्च प्रमाणीकृता। प्रमाणीकृतप्रश्नावल्या अनया पुनस्सर्वेक्षणविधिना विविधशिक्षाशास्त्रविद्वद्भ्यः आचार्येभ्यः अध्यापकेभ्यश्च दत्तांशसंग्रहणं विहितम्। दत्तांशसंग्रहणस्यास्य विश्लेषणं विभिन्न सांख्यकीयप्रविधिभिः व्यधीयत।

पश्चात् पाठयोजनायां के के विन्दवः, के स्तम्भाः, कानि कानि सोपानानि भवेयुः इति प्रश्नावलीद्वारा दत्तांशसंग्रहणं कृत्वा प्राप्तफलानां विश्लेशणञ्च विहितम्। अनन्तरं पञ्चबिन्दुप्रश्नावल्या हर्बर्ट, ब्लूम्स्, जान डयूयी, किल्पेट्रिक इत्येतेषां सोपनानि तथा उद्देश्येषु कानि कथमुपयोक्तव्यानीति ज्ञातम्। अत्र अनिवार्यरूपेण अधिकशिक्षाशास्त्रिभिः सूचितबिन्दवः अनिवार्यरूपेण, सान्दर्भिकरूपेण सूचितबिन्दवः सान्दर्भिकरूपेण, प्रारूपे संस्थाप्य आदर्शपद्यपाठयोजनायाः प्रारूपं निर्मितम्। इदानीं शिक्षाशास्त्रविद्वद्भिः प्रश्नावल्यां सूचितरीत्या आदर्शगद्यपाठयोजनाप्रारूपाणि प्रदर्श्यन्ते।

**आदर्शसंस्कृतगद्यपाठयोजनाप्रारूपम**

**प्राथमिकांशाः**

1. छात्राध्यापकस्य/छात्राध्यापिकायाः नाम
2. विद्यालयस्य नाम
3. दिनाङ्कः
4. अन्तरम्

5. अवधिः
6. कक्ष्यावर्गः
7. छात्रसंख्या
8. छात्राणां मध्यायुः
9. विषयः – पाठप्रकारः
10. पाठयांशः
11. प्रकरणम

**पाठ्यवस्तु** (गद्यस्य आदिः अन्तं च लेखनीयम्)

**उद्येश्यानि**

**सामान्योद्येश्यानि**

1. लेखकभावाविष्करणम्।
2. छात्राणां शब्दकौशलाभिवर्धनम्।
3. संस्कृतभाषायाःश्रवण–वाचन–पठन–लेखनकौशलानामुत्पादनम्।
4. भिन्नरचनाशैलीनां परिचयः।
5. गद्यसाहित्याध्ययने अभिरूच्युत्पादनम्
6. छात्रेषु कल्पनाशक्तेः विकासः।
7. छात्रेषु गद्यांशस्य अर्थग्रहणक्षमतोत्पादनम्।
8. छात्रेभ्यः संस्कृतभाषायाः व्यावहारिकज्ञानप्रदानम्।
9. संस्कृतकथानां पठने अभिरूच्युत्पादनम्।
10. छात्राणां विश्लेषणशक्तेः तर्कशक्तेश्चाभिवर्धनम्।
11. छात्राणं चिन्तनशक्तेः जागरणम्।
12. छात्राणां गद्यगतादर्शानुसारं स्वकीयजीवने आचरणाय प्रेरणादानम्।
13. छात्रेषु सर्जनात्मकतायाः विकासः।
14. छात्राणां निरीक्षणशक्तेः विकासः।
15. छात्रेषु अनुवादक्षमतासम्पादनम्।

(प्राग्विद्यमानेषु उद्येश्येषु आवश्यकतानुगुणं पर्याप्तानि उद्येश्यानि सान्दर्भिकानि चिनुयात्।)

**विशिष्टोद्येश्यानि**

| | |
|---|---|
| ज्ञानात्मकानि (भाषागतानि) | (अत्र संस्कृतभाषायाः अभिवृद्ध्यै अनुस्मरणात्मकानि, अभिज्ञानात्मकानि, वर्णनात्मकानि पदानि भवन्ति। सन्धिसमासादयः पूर्वपरिचितविषयाः भवेयुः।) |
| ज्ञानात्मकानि (विषयगतानि) | (वक्ष्यमाणपाठयांशसम्बद्धविषयः अनुस्मर्यते।) |
| | |
| अवबोधात्मकानि (भाषागतानि) | (संस्कृतभाषाभिवर्धनाय वर्णनात्मकानि नूतनानि पदानि सन्धिसमासादिव्याकरणांशाः भवन्ति। अर्थात् येषां ज्ञानं पूर्वं नास्ति तेशां विस्तृतावबोधनेन अर्थावगमनं सम्भवति। |
| अवबोधात्मकानि (विषयगतानि) | (यः विषयः पूर्णतया भवति विशिष्य विश्लेषणार्हः भवति तदपि वक्ष्यमाणपाठभावविषयमाधारीकरोति।) |
| कौशलात्मकानि | (श्रवणभाषणपठनलेखनकौशलानाम् अभिवर्धकानि पदानि वाक्यानि वा संसूचनीयानि तथैव विश्लेषणात्मकानि संश्लेषणात्मकानि पदानि संन्धिसमासादीनि वा भाषाकौशलाभिवर्धकानि अत्र लेख्यानि।) |
| अभिरूच्यात्मकानि | (कवौ, काव्ये, वाङ्मये, व्याकरणे, भाषायां च अभिरूचिं समुत्पादयितुं यः प्रयत्नः विधीयते सः लेखनीयः।) |
| अनुभूत्यात्मकानि | (काव्यसौन्दर्यानुभूत्या रसोत्पादकानि, पदबन्धानि, चमत्कारयुक्तानि, व्यंङ्यानि, कल्पनागतानि इत्यादीनि काव्यसम्बद्धानि वाक्यानि, विशेषांशाः वा अत्र प्रस्तूयन्ते। |
| सर्जनात्मकानि | (यदि पाठ्यांशे छात्राणां सर्जनात्मकताभिवृद्ध्यै कोऽपि विषयः विशेषरूपेण अभिज्ञातः तर्हि स लेखनीयः।) |
| क्रियात्मकानि | (यदि पाठ्यांशे छात्राणां क्रियाकौशलविषयः विशेषरूपेणाभिज्ञातः तर्हि सन्दर्भानुगुणं स लेखनीयः। |

**अध्यापनबिन्दवः**

(ये बिन्दवः पाठयोजनायां पाठप्रवर्धनसमये प्रस्तुतीक्रियन्ते तेऽत्र प्रस्तोतव्याः)

**उपकरणानि**

**सामान्योपकरणानि**

1. पाठ्यपुस्तकम्
2. कृष्णफलकम्
3. सुधाखण्डः
4. सूचीदण्डः
5. मार्जनी

} एतान्यनिवार्यरूपेण भवन्ति।

1. आकुड्चनश्यामफलकम्
2. करपत्राणि
3. कोषाः

} सन्दर्भानुगुणं लेख्यानि।

**विशिष्टोपकरणानि**

1. दृश्योपकरणानि
2. श्रव्योपकरणानि
3. दृश्यश्रव्योपकरणानि

सन्दर्भानुगुणं प्रलेख्यानि।

**पूर्वज्ञानम्**

(प्रस्तावनाप्रस्तुत्यर्थं वक्ष्यमाणविषयसम्बद्धः छात्राणां पूर्वाधारितः अंशः कः इति उल्लेखनीयः।)

**पाठने विशिष्टप्रयोगाः**

(अत्र वक्ष्यमाणपाठ्यांशे निश्चितपाठयोजनायाः अनुगुणं तदतिरिच्य वा कोऽपि प्रयोगः अर्थात् नूतनविधीनां प्रविधीनामुपयोगः यदि क्रियते तर्हि ससन्दर्भानुगुणं लेखनीयः)

**(सोपानमिदं सान्दर्भिकम्)**

| **सोपानानि** | **पाठ्यवस्तु** | **लक्षिताधिगमविशेषाः** | **अध्यापकच्छात्रक्रियाः** | **मूल्याङ्कनम्** |
|---|---|---|---|---|
| **प्रस्तावना**<br>(3 निमेषाः) | पूर्वज्ञानम् | अनुस्मारणम्। | (पूर्वज्ञानसम्बद्धः विषयः प्रशनकरण–कथा–चित्रादिविधिभिः उपस्थाप्यते।)<br>**अध्यापकः– (**प्रश्नान् पृच्छति।)<br>**छात्रः**–(उत्तरं ददति) | |
| **उद्देश्यकथनम्**<br>(1 निमेषः) | (प्रकरणस्य नाम लेखनीयम्)। | पाठोन्मुखीकरणम्। | **अध्यापकः–** (पाठयांशस्य जीवातुभूतमुद्येश्यं किमिति प्रकटयति। शीर्शकं श्यामपटे लिखति। पाठयपुस्तके पाठ्यांशस्य पृष्ठसंख्याम् उक्त्वा उद्घाटितुं सूचयति।)<br>**छात्राः** –(अध्यापकेन सूचितपाठयांशमुद्धाट्य पश्यन्ति।) | |
| **आदर्शवाचनम्**<br>(1–2 निमेषाः) | पाठयांशस्य आरम्भः . ........ अन्तं च लेखनीयम्। | श्रवणकौशलसम्पादनम्। | **अध्यापकः**<br>–(गतियतिलयभावस्फुटीकरणपूर्वकं कक्ष्योचितस्वरेण एकवारं गद्यं स्पष्टं वाचयति।<br>**छात्राः** –(सावधानमभिरूचिपूर्वकं पश्यन्तः शृण्वन्ति।) | |
| **अनुवाचनम्**<br>(2 निमेषाः) | पाठयांशस्य आरम्भः . ....... अन्तं च। | वाचन/ पठनकौशल सम्पादनम्। | **अध्यापकः** –(कांश्चन छात्रान् गद्यं पठितुं सूचयति। सन्दर्भानुगुणम् अन्यान् छात्रान् तस्य वाचने दोषानन्वेष्टुं सूचयति।)<br>**छात्राः** –(निर्दिष्टं पाठ्यांशं पठन्ति।) | |
| **त्रुटिसंशोधनम्**<br>(2 निमेषाः) | पाठयांशस्य आरम्भः . ........ अन्तं च। | शुद्धोच्चारण–लेखन कौशलसम्पादनम्। | **अध्यापकः** – (अनुवाचनसमये छात्राणामुच्चारणे अनुभूतत्रुटीः छात्राणां, श्यामपट्स्य च साहाय्येन दूरीकरोति।)<br>**छात्राः** –(स्वीयोच्चारणे समागतान् लेखनोच्चारणदोषान् दूरीकुर्वन्ति।)<br>अशुद्धम् शुद्धम्<br>................ ...............<br>............... ................ | |
| **परिचयः**<br>(1 निमेषः) | कवेः जीवनेतिहासः/ काव्यम्। | कवेः जीवनेतिहास – कृतीनां ज्ञानसम्पादनम् / काव्यमहत्वज्ञानम्। | **अध्यापकः**–(वर्णयति)<br>**छात्राः** (श्रृण्वन्ति) | **प्रश्नाः** |
| **पदार्थोक्तिः / पाठप्रवर्धनम्** | अध्यापनबिन्दवः | अध्यापनबिन्द्वनुगणं लक्षिताधिगमविशेषाणां | **प्रविधिः**<br>**अध्यापकः** –(प्रत्येकमध्यापनबिन्दुं | **प्रश्नाः** |

| | | | | |
|---|---|---|---|---|
| (14 निमेषाः) | | स्पष्टीकरणम्। | स्वीकृत्य विभिन्नैः विधिप्रविधिभिः उपस्थापन – दृढीकरण – प्रयोग – मूल्याङ्कनसोपानानि अनुसृत्य पाठयति।) **छात्राः–**(प्रतिक्रियां कुर्वन्ति।) | |
| **भावनिष्कासनम्** (7 निमेषाः) | पाठ्यांशस्य आरम्भः . ........... अन्तम्। | भावाविष्करणम्। | **अध्यापकः–**(पाठप्रवर्धने नूतनपदानि व्याख्यातानि। सर्वैः छात्रैः अवगतानि। इदानीमध्यापकः कांश्चन छात्रानुत्थाप्य तन्मुखेभ्यः पाठयांशस्थवाक्यानां भावं निस्सारयति। यदि कोऽपि सन्देहः तान् अध्यापकः दूरी करोति।) **छात्राः–**(एकैकस्य वाक्यस्य भावमेकैकः छात्रः पठित्वा व्याख्यानं करोति।) | |
| **सारांशनिष्कासनम्** (5 निमेषाः) | पाठ्यांशस्य आरम्भः . ........... अन्तम्। | सरांशनिष्कासनम्। | **अध्यापकः–**छात्रसाहाय्येन गद्यांशभावं वाचयति। यत्र क्लेशः अनुभूयते छात्रैः तत्र साहाय्यं करोति।) **छात्रा :–**(गद्यांशस्य भावं वदन्ति।) | |
| **सारांशकथनम्** (3 निमषाः) | पाठयांशस्य आरम्भः . ........ अन्तम् च। | विषयस्पष्टीकरणम्। | **अध्यापकः–**(दृश्यश्रव्योपकरणान्युपयुज्य गद्यांशस्य संक्षिप्तव्याख्यानं कृत्वा जीवातुभूतमुद्देश्यमाविष्करोति। **छात्राः–**(सम्पूर्णतया पाठमवगच्छन्ति।) | |
| **मौनवाचनम् / स्वाधिगम–मूल्यांकनम्** (2 निमेषाः) | पाठितपाठ्यांशः। | अधिगमस्थाय्यवगमनम्। | **अध्यापकः–**(छात्रान् निमेषत्रयं पाठितं विषयं मौनतया पठितुं निर्दिशति। एवमधिगतविषयाः के? अनधिगतविषयाः के? इत्यपि अवलोकयितुं सूचयति। **छात्राः–**(मौनेन पठन्तः स्वाधिगममूल्याङ्कनं कुर्वन्ति।) | |
| **सन्देहनिवृतितः / चर्चा** (2 निमेषाः) | पाठितपाठ्यांशः | अधिकारसम्पादनम। कल्पनाशक्तेः जागरणम् / सर्जनात्मकतायाः विकासः / पाठयांशे स्वामित्वसम्पादनम् / चिन्तनस्तराभिवर्धनम्। | **अध्यापकः–**(छात्रान् सन्देहान् प्रष्टुं सूचति। तथैव विचारोत्तेजकसमस्यामुपस्थाप्य चर्यायाः आरम्भः करोति, छात्रसन्देहान् निवारयति च।) **छात्राः–**(पाठयांशे विद्यमानान् सन्देहान् पृच्छन्ति, चर्चायां स्वीयविचारान् प्रकटयन्ति।) | |
| **पुनरावृत्तिप्रश्नाः** (2 निमेषाः) | पाठ्यांशस्य आरम्भः . ........ अन्तम्। | ज्ञातांशस्य दृढीकरणम्। | **अध्यापकः–**(पाठ्यांशात् गहनतया प्रश्नान् पृच्छति।) **छात्राः– (**समाधानं यच्छन्ति।) | |
| **शीर्षिकान्तर–प्रकटनम् / उपशीर्षकम्** (1 निमेषः) | पाठितपाठ्यांशः | सर्जनात्मकतायाः विकासः। | **अध्यापकः –**(अस्य प्रकरणस्य ........ इति शीर्षकं निर्दिष्टमस्ति। तद्वदेतस्य अन्यानि स्वाभिमतशीर्षकाणि कानि भवितुमर्हन्तीति वदन्तु इति सूचयति।) **छात्राः–**(छात्राः ................., .......... इत्यादीनि शीर्षकाणि सूचयन्ति।) | |
| **अनुप्रयोगः (गृहकार्यम्)** (1 निमेषः) | पाठितपाठ्यांशः | ज्ञातांशस्य दृढीकरणम् / लब्धस्य ज्ञानस्योपयोगः / रचना कौशलम् / नव्य ज्ञानार्जनम्। | **अध्यापकः :–**(श्यामफलके लक्षिताधिगमविशेषानुरूपं गृहकार्यं लिखति।) **छात्रा :–**(स्वपुस्तिकासु लिखन्ति।) | |

**आत्मनिरीक्षणम् (Teacher's Self Evaluation)**

(अध्यापकः अभिलषितव्यवहारपरिवर्तनार्थं पाठनानन्तरं स्वयं पाठिते विषये पाठनप्रकारे, कक्षानुशासने, उपकरणप्रयोगे च गुणदोषविमर्शनम् आत्मनिरीक्षणद्वारा (Introspection) करोति। अत्र लिखति च।)

**निरीक्षकसूचनाः**

(पाठनसमये छात्राध्यापकस्य गुणदोषान् निरीक्षकः अत्र लिखति।)

**सहायकग्रन्थसूची**

1. *डा. सि. एच्. एल्. एन्. शर्मा (1996), संस्कृतशिक्षणम्, भारतमुद्रप्रकाशनम्, पुरूनाट्टुक्करा।*
2. *ज्ञाने धर्मः उत प्रयोगे (2000), संस्कृतभारती, नवदेहली।*
3. *डा. कानाल नलचक्रवर्ती (2001), संस्कृताध्यापनम् – श्रीवेड्क्टाम्बा पब्लिकेशन्स् , तिरूपतिः।*
4. *डा. वि. मुरलीधरशर्मा (2003), संस्कृतशिक्षणसमस्याः, राष्ट्रियसंस्कृतविद्यापीठम् तिरूपतिः।*
5. *डा. रमाकान्तमिश्रः (2006), शैक्षिकप्रविधिः, चौखम्बा विद्याभवन्, वाराणसी।*
6. *डा. सन्तोष् मित्तल् (2006), संस्कृतशिक्षणम्, जैपूर,।*